- Title – (महाभारत सम्बन्धी वर्णन) अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 9/18
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – धृतराष्ट्र उवाच। नारायणोनाम नरोनराणां
- End – कृष्णाय वासुदेवाय देवाय देवकी नंद
- Colophon-
- Illustrations -
- Source -
- Subject - महाभारत
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण है।

ध्रु उवाच ॥ नारायणो नाम नरो नराणां प्रसिद्धचौरः कथितः पृथिव्यां
अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मरणमात्र एव ॥ ४ ॥ युधिष्ठिर
उवाच ॥ मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भासितांगं ॥ पु
ण्योपेतं पुंडरीकायताक्षं विष्णुं वंदे सर्वलोकैकनाथं ॥ ५ ॥ श्री भीष्म उवाच ॥ ज
लौघमग्ना सचराचरा धरा विषाणकोट्याखिलविश्वमूर्त्तिना ॥ समुधृता
येन वराहरूपिणा स मे स्वयंभूर्भगवान प्रसीदतु ॥ ६ ॥ अर्जुन उवाच ॥ अ
चिंत्यमव्यक्तमनंतमव्ययं विभुं प्रभुं भावितभूतभावनं ॥ त्रैलोक्यविस्तार वि

वारकारकहरिंप्रपन्नो स्मिगतिं महात्मनां ॥ नकुल उवाच ॥ यदिगमनमे
च स्तात्काल पाशानुबं...धात् ॥ यदि चकुलविहीने जायते पक्षिकीट
कृमिनृगमपि गत्वा जायते चांतरात्मा मम भवतु हृदि स्था केशवे भ
क्तिरेका ॥ ८ ॥ महदेव उवाच ॥ नमय यज्ञवराहस्य विश्लोरतुलतेजसः ॥ प्र
णामं ये पि कुर्वंति तेषामपि नमोनमः ॥ ९ ॥ कुंतीसुवाच ॥ स्वकर्मफलनि
दिष्टां यां यां योनि ब्रजाम्यहं ॥ तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥ १० ॥
माद्री उवाच ॥ कृष्णे रत्ता कृष्ण मनुस्मरंति रात्रौ च कृष्णं पुनरुत्थिता ये ॥ ते

स्मरणांकुतमस्ते ॥८८॥ नारद उवाच ॥ मनसा कर्मणा वाचा ये स्मरंति जनार्दनं ॥ कृतं तु
रिमहत्स्नात्रिध्यानमेकं विशिष्यते ॥८९॥ सनत्कुमार उवाच ॥ मतो वै चनव
च्छिद्रं बाधियस्ते कलेवरं ॥ औमधुंजा कुर्वीतो यद्वै होनारायणो हरीः ॥९०॥ नार
द उवाच ॥ भोजने छादने चिंता वृथा कुर्वंति वैष्णवाः ॥ योसौ विश्वंभरो देव
कथं भक्ताननुपेक्षते ॥९१॥ सो उवाच ॥ नभूमिपर्वतानां च नैव भारो भवनस्मृतेः ॥
विष्णुभक्तिविहीनस्य तस्य भारः सदा मम ॥९२॥ नारद उवाच ॥ गत्वा गत्वा निवर्तं
ते चंद्रसूर्यादयो ग्रहाः ॥ अद्यापि न निवर्तंते द्वादशाक्षरचिंतकाः ॥९३॥ यस्य हस्ते
गदा चक्रं गरुडो यस्य वाहनं ॥ शंखपद्मं करे यस्य स मे विष्णुः प्रसीदतु ॥९४॥
एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥ कीर्तयंति सुरश्रेष्ठमेकं नारायणं
विभुं ॥९५॥ श्लोकार्द्धेन प्रवक्ष्यामि युएपापे जनार्दनं ॥ दुःस्वप्ननाशनं स्तोत्रं
पांडवैः परिकीर्तितं ॥९६॥ यः पठेत्प्रातरुत्थाय वैष्णवं स्तोत्रमुत्तमं ॥ सर्वपाप

ध्येयस्मरं निजजनार्द्दनं ॥ नंदनंदनकुरुक्षेत्रं प्रयागं नैमिषं वनं ॥ ८ ॥ श्रीपृथुरुवाच ॥ आ
लोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः स
दा ॥ ९ ॥ मंगलं भगवान्विष्णुर्मंगलं गरुडध्वजः ॥ मंगलं पुंडरीकाक्षो मंगलाय
तनो हरीः ॥ १० ॥ श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रंथकोटिभिः ॥ परोपकाराय पुण्या
य पापाय परपीडनं ॥ ११ ॥ जयतु जयतु देवो देवकीनंदनोयं जयतु जयतु कृष्णो
वृष्णिवंशप्रदीपः ॥ जयतु जयतु मेघश्यामलः कोमलांगो जयतु जयतु पृ
थ्वीभारनाशो मुकुंदः ॥ १२ ॥ श्रीपिप्पलायन उवाच ॥ श्रीमच्छ्रीसिंहविभवे गरुडध्वजा
यनाय त्रयोपतापशमनाय भवौषधाय ॥ कृष्णाय वृश्चिकजलाग्निभुजंगरोगक्लेशा
व्ययाय हरये गुरवे नमस्ते ॥ १३ ॥ हे स्वच्छदीयपदपंकजपंजरांते अद्यैव मे वसतु
मानसराजहंसः ॥ प्राणप्रयाणसमये कफवातपित्तैः कंठावरोधनविधौ

घस्तु नत्रं निर्त्वं वृत्ता मिमूारणां हरिं ॥ गार्ग्य उवाच ॥ नारायणेति
मंत्रो स्ति वाग स्ति वसवर्त्तिनी तथापि नरके घोरे पतंतीत्येद द्भु
तं ॥१०॥ दाल्भ्यो वाच ॥ वासुदेवे मनो यस्य जप होमार्चनादिषु त
स्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलं ॥११॥ किंतस्य वा धुनिर्मैत्रे सं
क्रियस्य जनार्द्दने नमो नारायणायेति मंत्रो सर्वार्थसाधकः ॥१२॥
मैत्रेय उवाच ॥ जीवितं विष्णु भक्तस्य वरं पंचदिनानि च न तु कल्प
सहस्राणि भक्तिहीनस्य केशवे ॥१३॥ वैशंपायन उवाच ॥ यत्र यो
गेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ॥ तत्र श्री विजयो भूतिर्ध्रुवा नीतिर्म
तिर्मम ॥१४॥ वत्स्यंतर उवाच ॥ अच्युतानंद गोविंद नामोच्चारण
॥ भेषजं नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहं ॥१५॥ अंगिर उवाच ॥

हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः ॥ अनिछयापिसंस्पृष्टोदहत्येवहिपावकः ॥७६॥ पाराशर उवाच ॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ॥७७॥ पुलस्ति उवाच ॥ हे जिह्वे रससारज्ञे सर्वदामधुरप्रिये ॥ नारायणाख्यंपीयूषंपिबजिह्वेनिरंतरं ॥७८॥ श्रीवेदव्यास उवाच ॥ सत्यंसत्यंपुनःसत्यं उद्धृत्यभुजमुच्यते वेदाच्छास्त्रंपरंनास्तिनदेवःकेशवात्परः ॥७९॥ मार्कंडेय उवाच ॥ साहानिस्तन्महच्छिद्रंसाचांधजडमूकता यन्मुहूर्त्तंक्षणंवापिवासुदेवंनचिंतयेत् ॥८०॥ अगस्त्य उवाच ॥ निमिषंनिमिषार्द्धंवाप्राणिनांविष्णुचिंतनं कृतकोटिसहस्राणांध्यानमेकंविशिष्यते ॥८१॥ ॥ ॥ निमिषंनिमिषार्द्धंवा ॥

णपापानां कृष्णे भक्तिः प्रजायते ॥५२॥ सा चुचूर्ध्वं महीपाल विष्णु
भक्तिमया त्वया: यस्य स्मरणमात्रेण महापातकनाशनं ॥५३॥
प्रह्लाद उवाच ॥ नाथयोनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु
तेष्वचला भक्तिरच्युतास्तु सदा त्वयि ॥५४॥ या प्रीतिरविवेकानां
विषयेष्वनपायिनी त्वामनुःस्मरतः मा मे हृदयान्मापसर्पतु
॥५५॥ विश्वामित्र उवाच ॥ किं तस्य दानैः किं तीर्थैः किं तपोभिः
किं मध्वरैः ॥ य एवं ध्यायते नित्यं नारायणमनन्यधीः ॥५६॥
युधिष्ठिर उवाच ॥ नित्योत्सवो भवेत्तेषां नित्यं श्रीर्नित्यमंग
लं येषां हृदिस्थो भगवान् ॥ मंगलायतनो हरिः ॥५७॥ ना

७

मिमनुजास्तयमूर्द्धवाहुर्यो मां मुकुंद नृसिंहजनार्द्दनेति जीवो
जपत्यनुदिनं मरणे रणे वा पाषाणकाष्ठसदृसाय ददाम्यभीष्टं
॥४८॥ ईश्वर उवाच ॥ सकृन्नारायणेत्युक्त्वा पुमान् कल्पत्रयात्
त्रयं गंगादिसर्वतीर्थेषु स्नातो भवति पुत्रक ॥४९॥ अंतकाले
स्मरणाद्विष्णुःप्राप्यते परमं पदं येनपादोदकं विष्णोर्नैत्यामू
र्द्धीनकृतं यमः ॥ पार्वत्युवाच ॥ तत्रैव गंगा यमुना च वेणी गो
दावरी सिंधु सरस्वती च सर्वाणि तीर्थानि वसंति तत्र यत्राच्युतो
दारकथाप्रसंग ॥५०॥ यम उवाच ॥ नरके पच्यमानस्तु यमेन प
रिभाषितः किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥५१॥ ना
रद उवाच ॥ जन्मांतरसहस्रेषु तपोध्यानसमाधिभि नराणांक्षी

त॥६३॥वसिष्ठ उवाच॥ कृष्णेति मंगलं नाम यस्य वाचा प्रवर्त्तते त
स्मीभवंति तस्याशु महापातककोटय॥६४॥ अरुंधत्युवाच॥ कृ
ष्णाय वासुदेवाय हरये परमात्मने प्रणतः क्लेशनाशाय गो
विंदाय नमो नमः॥६५॥ कश्यप उवाच॥ कृष्णानुस्मरणादेव पा
पसंघातपंजरं शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा॥ भृगु
रुवाच॥ नामैव तव गोविंद नाम त्वत्तः शताधिकं ददात्युच्चा
रणान्मुक्तिं विनाप्यष्टांगयोगतः॥६७॥ लोमश उवाच॥ वद
२ मि नारायण नाम निर्मलं स्मरामि नारायण तत्त्वमव्ययं भ
जामि नारायण पादपंकजं करोमि नारायणपूजनं सदा॥६८॥
शौनक उवाच॥ स्मृते सकलकल्याणं भाजनं यत्र जायते पुरु

रक्षोत उवाच ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजय तेषां मिं
दिवरश्यामो हृदिस्थो यज्जनार्दन ॥५८॥ गौतम उवाच ॥ त्रैलो
क्यचैतन्यमयादिदेव श्री नाथ विष्णो भवदाज्ञयैव प्रातः समुत्थाय
तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥५९॥ कोटिदानं ग्रहणे
षु काशी माघप्रयागेऽयुतकल्पवासी यज्ञायुतं मेरुसुवर्णदानं गो
विंदनामस्मरणेन तुल्यः ॥६०॥ अत्रि उवाच ॥ गोविंदेति सदा
स्नानं गोविंदेति सदा जपः गोविंदेति सदा ध्यानं सदा गोविंदकीर्त
नं ॥६१॥ अक्षरं हि परं ब्रह्म गोविंदेत्यक्षरत्रयं तस्मादुच्चरितं येन
ब्रह्मभूयाय कल्पते ॥ श्री वादरायण उवाच ॥ अच्युतः कल्पवृक्षो
सौऽनंतः कामधेनुश्चिंतामणिस्तु गोविंदो हरिर्नाम विचिंतये

णं वुजमादरेण श्री श्री निवासपुरुषोत्तमदेहिदास्यं ॥२१॥ चैत्र राधेवा व ॥
नमो नमः कारणवामनाय नारायणाय मितविक्रमाय श्री शार्ङ्गचक्रा
सिगदाधराय नमो स्तुत्तस्मै पुरुषोत्तमाय ॥२२॥ आंचार्युवाव ॥ त्वमेव मा
ता सि पिता सि पिता त्वमेव त्वमेव वंधुश्च सखा त्वमेव ॥ त्वमेव विद्या द्र
विणं त्वमेव त्वमेव सर्वं मम देवदेव ॥२३॥ वासूदेवजनाकष्टं कष्टं निर्द्व
नजीवनं ॥ पुत्रनोकमहाकष्टं कष्टात्कष्टतरं द्धुचा ॥२४॥ दुर्योधन उ
वाव ॥ जानामि धर्मं न च मे प्रवर्त्तिर्जानामि पापं न च मे निवर्त्ति केना

ष्येन जनार्द्दनेन ॥ ते ते गत्वा विष्णुपुरीं द्रुक्षो चोपि देवस्य वरेण तुल्य ॥ २८ ॥
कृपाचार्यो वाच ॥ अजन्मनः फलमिदं मधुकैटभारे मत्प्रार्थनीयमद
नुग्रह एष एव ॥ त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति
मां स्मर लोकनाथ ॥ २९ ॥ गोविंद केशव जनार्द्दन वासुदेव विश्वेश वि
श्व मधुसूदन विश्वरूप ॥ श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष नाराय
ण अच्युत नृसिंह नमो नमस्ते ॥ ३० ॥ कर्ण उवाच ॥ नान्यं वदामि न शृणोमि
न चिंतयामि नान्यं स्मरामि न भजामि न चाश्रयामि ॥ भक्त्या त्वदीय चर

13

दशाश्वमेधी पुनरेपि जन्मा कृष्णप्रणामी न पुनर्भवाय ॥१५॥ अग्निमन्युवाच ॥ गोविंद गोविंद हरे मुरारे गोविंद गोविंद मुकुंद कृष्ण गोविंद गोविंद रथांगपाणे गोविंद गोविंद नमामि नित्यं ॥१६॥ चुश्चद्युनउवाच ॥ श्रीराम नारायण वासुदेव गोविंद वैकुंठ मुकुंद कृष्ण ॥ श्रीकेशवानंत नृसिंह विष्णो मां त्राहि संसार भुजंगदष्टं ॥१७॥ सात्यकीउवाच ॥ अप्रमेय हरे विष्णो कृष्ण दामोदराच्युतः गोविंदानंत सर्वेश वासुदेव नमोस्तुते ॥१८॥ उद्धव उवाच ॥ वासुदेवं परित्यज्य यो

स्मिन्देहाप्रविशंतिकृष्णेहविर्यथामंत्रकृतंहुताशे॥११॥ द्रौपद्युवा
च॥ कीटेषुपक्षिषुमृगेषुसरीसृपेषुरक्षःपिशाचमनुजेष्वपियत्र
यत्र॥ जातस्यमेभवतुकेशवतेप्रसादात्त्वय्येवभक्तिरचलावि
भिचारिणीच॥१२॥ हेकृष्णद्वारिकावासीन्क्वासियादवनंदन॥ ईमा
मवस्थांसंप्राप्तांकिंनजानासिकेशव॥१३॥ शंखचक्रगदापाणेद्वारका
निलयायाच्युत॥ गोविंदपुंडरीकाक्षरक्षमांशरणागतां॥१४॥ सुम
दु उवाच॥ एकोपिकृष्णस्यकृतप्रणामोदशाश्वमेधावभृथेनतुल्यः

ण स्थितास्त्वमी नाथो घोरेषु व्याधिषु वर्त्तमानाः ॥ संकीर्त्त्य नारायणश
ब्दमात्रं विमुक्तदुःखाः सुखिनो भवंति ॥ २४ ॥ अक्रूर उवाच ॥ अहमस्मि
नारायणदाससदाससदाससदासस्य च दाससदासः ॥ अन्योऽपीशो जगतो नरा
णां तस्मादहं चान्यतरोऽस्मिलोके ॥ २५ ॥ विदुर उवाच ॥ विपरीतेषु का
लेषु परिक्षीणेषु बंधुषु ॥ त्राहि मां कृपया कृष्ण शरणागतवत्सल ॥ २६ ॥ वा
सुदेवस्य ये भक्ताः शांतास्तद्गतमानसाः ॥ तेषां दाससस्य दासोहं भवे जन्मज
न्मनि ॥ २७ ॥ द्रोण उवाच ॥ ये ये हतास्चक्रधरेण राजन् त्रैलोक्यना

न्यदेवमुपासते ॥ तृषार्तो जाह्नवितीरे कूपं खनति दुर्मतिः ॥१९॥ गवां
त्यक्त्वा विमूढात्मा गर्द्धवीं वंद्यते यथा ॥ तथा हरिं परित्यज्य यो न्यदेव
मुपासते ॥२०॥ त्यक्त्वामृतं विमूढात्मा भुंक्ते हालाहलं विषं ॥ तथा हरिं प
रित्यज्य यो न्यदेवमुपासते ॥२१॥ अद्य मे सफलं जन्मः अद्य मे सफलं कुलं
अद्य मे सफलं देहो जीवितं सफलं च मे ॥२२॥ चौ सूत उवाच ॥ अपां समीपे
सयनासने ग्रहे दिवा च रात्रौ च पथि च गच्छतां ॥ यद्यस्ति किंचित्सुकृतं कृ
तं मया जनार्द्दनस्तेन कृत्तेन तुष्यतां ॥२३॥ संजय उवाच ॥ प्राज्ञा विषा

नायच नंदगोपकुमारायगोविंदायनमोनमः॥४०॥ सोमदत्तउवा
च॥ नमः परमकल्याण नमस्तेविश्वभावनः वासुदेवायशांता
ययदूनांपतयेनमः॥४१॥ विराटउवाच॥ नमोब्रह्मण्यदेवायगो
ब्राह्मणहितायच जगद्धितायकृष्णायगोविंदायनमोनमः॥४२॥नृ
ल्पउवाच॥ अतसीपुष्पसंकाशंपीतवाससमाच्युतं येनमस्यंतिगो
विंदंनतेषांविद्यतेभयं॥४३॥ नमः परमकल्याणंनमस्तेविश्वभा
वनः वासुदेवायशांतायदूनांपतयेनमः॥४४॥ बलभद्रउवाच॥
६ कृष्णकृष्णकृपालोत्वंअगतीनांगतिर्भव संसारार्णवमग्नानांप्रसीदपु
रुषोत्तमः॥४५॥ श्रीकृष्णउवाच॥ कृष्णकृष्णेतिकृष्णेतियोमांस्मर
तिनित्यशः जलंभित्वायथापद्मंनरकादुद्धराम्यहं॥४६॥ सत्यव्रुवी

18

पिदेवेन हृदिस्थितेन यथा नियुक्तोस्मि तथा करोमि ॥ ३५ ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये ॥ ३६ ॥ यंत्रस्य गुणदोषेण यंत्री व पुरुषोत्तम ॥ अहं यंत्री भगवान यंत्री मम दोषो न दीयते ॥ ३७ ॥ रूप दो वाव ॥ यत्कृतेना च्युत गोविंद माधवानंत केशव कृष्ण विष्णो हृषीकेश वासुदेव नमोस्तुते ॥ ३८ ॥ जप दू ण उ वाव ॥ नमः कृष्णाय शुद्धाय ब्रह्मणेनंतमूर्त्तये ॥ योगेश्वराय कृष्णाय त्वामहं शरणं गतः ॥ ३९ ॥ वि क र्ण उ वाव ॥ कृष्णाय वासुदेवाय देवकीनंद